कालीकवचम्

नं. १३३२

कालीकवचं
वैरिनाशकम्



क॰
का॰
१

ॐश्रीगणेशायनमः ॐनमःपरदेवतायै ॐकैलास
शिखरासीनंदेवदेवंजगद्गुरुं शंकरंपरियप्रच्छपा
र्वतीपरमेश्वरं १ श्रीपार्वत्युवाच भगवन्देवदेवेशादे
वेशादेवानांभोगदंप्रभो प्रब्रूहिमेमहादेवगोप्यंय
द्यपिचप्रभो २ शत्रूणांयेननाशःस्यादात्मनोरक्ष
णंभवेत् परमैश्वर्यमतुलंलभेद्येनहितंवद ३
भैरवउवाच वक्ष्यामितेमहादेविसर्वधर्मविदांवरे

अद्भुतं कवचं देव्याः सर्वकामप्रसाधकं ४ विशेषतः श
त्रुनाशकरं नृणां शुभावहं सर्वारिष्टप्रशमनमभि
चारविनाशनं ५ सुखदं भोगदं चैव वशीकरणमुत्त
मं शत्रुसंघाः क्षयं यान्ति भवन्ति व्याधिपीडिताः ६ दुः
खिनो ज्वरिणश्चैव स्वाभीष्टप्रच्युतास्तथा ॐ अस्य श्री
कालिकाकवचस्य भैरव ऋषिः अनुष्टुप् छंदः श्री
कालिका देवता शत्रुसंह्ननाशे विनियोगः अथ ऋ

क- ष्यादिन्यासः भैरवऋषयेनमः शिरसि अनुष्टुपछंदसे
का- नमो मुखे श्रीकालिकादेवतायैनमः हृदि शात्रुसंच
२ नाशेविनियोगः सर्वांगेषु अथकरन्यासः क्रांअंगुष्ठा
2 भ्यांनमः क्रींतर्जनीभ्यांस्वाहा क्रूंमध्यमाभ्यांवषट्
क्रैंअनामिकाभ्यांहुं क्रौंकनिष्ठिकाभ्यांवौषट् क्रः
करतलकरपृष्ठाभ्यांफट् अथहृदयादिन्यासः क्रां
हृदयायनमः क्रींशिरसेस्वाहा क्रूंशिखायैवषट्

क्रैं कवचाय हुम् क्रौं नेत्रत्रयाय वौषट् क्रः अस्त्रा
य फट् इति षडंगन्यासः ॐ ध्यायेत्कालीं महामायां त्रि
नेत्रां बहुरूपिणीं १ चतुर्भुजां ललज्जिह्वां पूर्णचंद्रनि
भाननां नीलोत्पलदलप्रख्यां शत्रुसंघविदारिणीं २
कमलं च तथा खड्गं करवालं करं तथा त्रिनेत्रां रक्त
वदनां दंष्ट्रालीं घोररूपिणीं ३ अट्टाट्टहासनिरतां
सर्वदा च दिगंबरीं शवासनस्थितां देवीं मुंडमालावि

क॰
का॰
३

भूषितां ॥ इति ध्यात्वा महाकालीं ततस्तु कवचं पठेत्
कालिका घोररूपा स्या सर्वकामप्रदा शुभा १२ सर्वदेव
स्तुता देवी शत्रुनाशं करोतु मे ॐ ह्रां ह्रीं स्वरूपिणी चैव
ह्रीं ह्रां ह्रुं स स्वरूपिणी १३ ह्रां ह्रीं ह्रैं ह्रः सः स्वरूपा स
दा शत्रून् प्रणाशतु मे श्रीं ह्रीं ऐं रूपिणी देवी भवबंधवि
मोचिनी १४ हसकलह्रीं सकलह्रीं रिपून्साहं तु स
र्वदा यया शुंभो हतो दैत्यो निशुंभश्च महासुरः १५

वैरिनाशाय वंदे तां कालिकां शंकरप्रियां ब्राह्मी शैवी वैष्णवी च वाराही नारसिंहिका १९ कौमारी ऐंद्री च चामुंडा खादंतु मम विद्विषः सुरेश्वरी घोररूपा चंडमुंडविनाशिनी १७ मुंडमालावृतांगी च सर्वतः पातु मां सदा ह्रां ह्रीं कालिके घोररूपे घोरदंष्ट्रे रुधिरप्रिये १८ रुधिरपूर्णवक्त्रे रुधिरावृतस्तनि मम शत्रून् खादय २ हिंस २ मारय २ भिंधि २ छिंधि २

का॰ उच्चाटय २ द्रावय २ शोषय २ स्वाहा गौरीकालिकायै
का॰ मदीयशत्रून्समर्पयामिस्वाहा जय २ किरि २ कि
ष टि २ कुट्ट २ मर्द २ मोहय २ हर २ ममरिपून्ध्वंसय
५ २ भक्षय २ त्रोटय २ यातुधानेचामुंडेसर्वजनान्
राज्ञोराजपुरुषान् स्त्रियोममवश्यान्कुरु २ तुरु
२ धान्यंधनमश्वान्गजान्रत्नानिदिव्यकामिनी
पुत्रान्राजश्रियंदेहिदेहियच्छयच्छ ह्रांह्रींह्रूंह्रैं

ह्रौं ह्रः स्वाहा इत्येतत्कवचं दिव्यं कथितं शंभुना पु
रा ये पठंति सदा तेषां ध्रुवं नश्यंति शत्रवः वैरि
णः प्रलयं यांति व्याधिता वा भवंति हि वलहीना
पुत्रहीना शत्रवस्तस्य सर्वदा सहस्रपठनात्सि
द्धिः कवचस्य भवेत्तथा तत्कार्याणि च सिद्ध्यंति यथा
शंकरभाषितं श्मशानांगारमादाय चूर्णं कृत्वा प्रय
त्नतः पादोदकेन पिष्ट्वा च लिखेल्लोहशलाकया भू

क॰
का॰
५

मौषशत्रून्हीतद्रूपाज्जराशिरसस्तथा हस्तंदत्वाणांक्र
त्वायेकदवंतद्वयंपठेत् शत्रोःशाणप्रतिष्ठांचवज्रयी
त्मंत्रेणमंत्रवित् हत्यादस्त्रप्रहारेणशत्रुंगच्छेयम
नयं ज्वलदंगारतापेनभवंतिज्वरिताभृशं शोषणे
वामपादेनदरिद्रोपतिताध्रुवं वैरिनाशाकरंप्रोक्तं
कवचंचवशप्रकारकं परमैश्वर्यदंचैवपूजाकालेच
यत्नतः सायंकालेतथापाठात्सर्वसिद्धिर्भवेद्ध्रु

वं शत्रुरुद्धाटनं यातिदेशाद्धविच्युतोभवेत् प
श्चात्किंकरनामेतिसत्यंसत्यंनसंशयः शत्रुनाश
करेदेविसर्वसंपत्करेभवेत् सर्वदेवस्तुनेदेविका
लिकेत्वांनमाम्यहं इतिश्रीरुद्रयामलेकालीकल्पे
वैरिनाशकवचंसंपूर्णम् ॥